श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्त महा देसिकाय नमः

---

Please install **Sanskrit New font** to view this file in sanskrit script.

---

## परमार्थ स्तुथिः

श्रीमान् वेङ्कट नाथार्यः कवितार्किक केसरी ।
वेदान्ता चार्य वर्योमे सन्निधत्तां सदाहृदि ॥

श्रीमद् गृध्र सरस्तीर पारिजातं उपास्महे ।
यत्र तुङ्गैर् अतुङ्गैश्च प्रणतैर् गृह्यते फलम् ॥१

गुरुभिस्त्वदनन्य सर्व भावैः
गुण सिन्धौ कृत संप्लवस्त्वदीये ।
रण पुङ्गव वन्दि भाव मिच्छन्
अहं अस्म्येकम् अनुग्रहम् आस्पतम् ते ॥२

भुवनाश्रय भूषणास्त्र वर्गं
मनसि त्वन्मयतां ममातनोतु ।
वपुराहव पुङ्गव त्वदीयम्
महिषीणां अनिमेष दर्शनीयम् ॥३

अभिरक्षितुम् अग्रतः स्थितं त्वाम्
प्रणवे पार्थ रथे च भावयन्तः ।
अहित प्रशमैर् अयत्न लभ्यैः
कथयन्ति आहव पुङ्गवं गुणज्ञाः ॥४

कमला निरपाय धर्म पत्नी
करुणाद्याः स्वयम् ऋत्विजो गुणास्ते ।
अवनं श्रयतां अहीनम् आद्यम्

स च धर्मस्त्वद् अनन्य सेवनीयः ॥५

कृपणाः सुधीयः कृपा सहायम्
शरणम् त्वाम् रण पुङ्गव प्रपन्नाः ।
अपवर्ग नयाद् अनन्य भावाः
वरिवस्या रसमेकं आद्रियन्ते ॥६

अवधीर्य चतुर्विधुं पुमर्थं
भवदर्थे विनियुक्त जीवितः सन् ।
लभते भवतः फलानि जन्तुः
निखिलान् यत्र निदर्शनम् जटायुः ॥७

शरणागत रक्षण व्रती माम्
न विहातुं रण पुङ्गवार्हसि त्वम् ।
विदितिं भुवने विभीषणो वा
यति वा रावण इत्युदीरितम् ते ॥ ८

भुजगेन्द्र गरुत्मदादि लभ्यैः
त्वद् अनुज्ञानुभव प्रवाह भेदैः ।
स्व पदे रण पुङ्गव स्वयम् माम्
परिचर्या विभवैः परिष्क्रियेथाः ॥९

विमलाशय वेङ्कटेश जन्मा
रमणीया रणा पुङ्गव प्रसादात् ।
अनसूयुभिर् आदरेण भाव्या
परमार्थ स्तुतिर् अन्वहम् प्रपन्नैः ॥१०

कवितार्किक सिंहाय कल्याणगुणशालिने ।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः

---

Please send your comments and suggestions to R.Venkat



rmvenkat@yahoo.com